मखानलः, पुं, (मखस्य अनलः मखसाध्योऽनल इत्यर्थः।) यज्ञाग्निः। तत्पर्य्यायः। महावीरः २। इति त्रिकाण्डशेषः॥

मखान्नं, क्ली, (मखे मखकाले भोज्यमन्नम्।) खाद्यबीजभेदः। माखाना इति भाषा॥ तत्पर्य्यायः। पद्मबीजाभम् २ पानीयफलम् ३।
"मखान्नं पद्मबीजस्य गुणैस्तुल्यं विनिर्द्दिशेत्।"
इति भावप्रकाशः॥

मखासुहृत्, [द्] पुं, शिवः। मखस्य दक्षयज्ञस्य असुहृत् शत्रुः नाशक इत्यर्थः। इति हेमचन्द्रः। २००॥

मग इ सर्पणे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) इ मङ्गति। इति दुर्गादासः॥

मगधः, पुं, (मगि+अच्। पृषोदरादित्वान्निष्पन्नः। मगं दोषं दधाति। धा+"आतोऽनुपसर्गे।" ३।२।३। इति कः। यद्वा, कण्वादिमगध+अच्।) कीकटदेशः। अधुना वेहाराख्यदेशस्य दक्षिणभागः। तद्देशस्थे पुं भूम्नि। इति शब्दरत्नावली॥ (यथा, महाभारते। ८। ४५। ४८।
"इङ्गितज्ञाश्च मगधाः प्रेक्षितज्ञाश्च कोशलाः।
अर्द्धोक्ताः कुरुपाञ्चालाः शाल्वाः कृत्स्नानुशासनाः॥")
बन्दी। इति हेमचन्द्रः। ७९५॥

मगधा, स्त्री, (मगधस्तन्नामा देश उत्पत्तिस्थानत्वेनास्त्यस्या इत्यर्श आदिभ्योऽच्। स्त्रियां टाप्।) पिप्पली। इति रत्नमाला॥ (यथा, सुश्रुते कल्पस्थाने सप्तदशाध्याये।
"हरेणुमगधाजाजि मञ्जिष्ठायष्टदन्वितम्॥")

मगधेश्वरः, पुं, (मगधस्य तदाख्यदेशस्येश्वरः।) जरासन्धराजः। इति हेमचन्द्रः॥ मगधदेशाधिपमात्रे च॥ (यथा, रघौ। ६। २०।
प्राक्सन्निकर्षं मगधेश्वरस्य
नीत्वा कुमारीमवदत् सुनन्दा॥")

मगधोद्भवा, स्त्री, (मगधे उद्भवो यस्याः।) पिप्पली। इति राजनिर्घण्टः॥ (यथा, सुश्रुते कल्पस्थान एकादशाध्याये।
"फलं हृत्वा मगधोद्भवाना-
मादाय कल्कं फलपाककाले।")
मगधदेशजाते त्रि॥

मग्नः, त्रि, (मस्ज्+क्तः। "ओदितश्च।" ८।२।४५। इति निष्ठातकारस्य नत्वम्। "स्कोः संयोगाद्योरन्ते च।" ८। २। २९। इति सलोपः। चोः कुत्वञ्च।) स्नातः। जलान्तःप्रविष्टः। डोवा इति भाषा॥ (यथा, देवीभागवते। १।६।२५।
"केन सृष्टं कथं जातं मग्नावावां जले स्थितौ॥")
मस्जधातोः कर्त्तरि क्तप्रत्ययेन निष्पन्नः॥

मघ, इ ङ भूषे। कविकल्पद्रुमः॥ (भ्वा० आत्म०-सक० सेट्।) इ, मङ्घते। इति दुर्गादासः॥

मघ, इ ङ कैतवाद्यर्थयोः। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-द्यूतक्रीड़ादौ अक०-गतौ निन्दायां आरम्भे च सक०-सेट्।) कैतवमिह कितवक्रिया अक्षक्रीड़नादिः। इ मङ्घते ङ मङ्घते अक्षैः कितवः। अध्यर्थो गतिनिन्दारम्भजवाः। कैतवजवयोरेवायमिति केचित्। इति दुर्गादासः॥

मघः, पुं, (मघि+अच्। पृषोदरात् साधुः।) द्वीपविशेषः। इति मेदिनी। घे, ४॥ देशविशेषः। स तु मग्नामकम्लेच्छानां स्थानम्॥ पुष्पविशेषे क्ली। इति शब्दरत्नावली॥ (क्लीं मंहनीयं धनम्। यथा, ऋग्वेदे। ७। २१। ७।
"इन्द्रो मघानि दयते विषह्येन्द्रं वाजस्य जोहुवन्तसातौ॥"
"मघानि मंहनीयानि धनानि।") इति तद्भाष्ये सायनः।)

मघवती, स्त्री, (मघवत्+ङीप्। इन्द्राणी। इति मुग्धबोधव्याकरणम्॥

मघवा, [न्] पुं, (मह्यते पूज्यते इति। मह पूजायाम्। "श्वन्नुक्षन् पूषन् प्लीहन्निति।" उणा०। २। १५८। इति कनिन्। निपातनात् हस्य घः अवुगागमश्च।) इन्द्रः। इत्यमरः १। १। ४४॥ (यथा, रघौ। १। २६।
दुदोह गां स यज्ञाय शस्याय मघवा दिवम्।
सम्पद्विनिमयेनोभौ दधतुर्भुवनद्वयम्॥")
जिनानां द्वादशचक्रवर्त्त्यन्तर्गतचक्रवर्त्तिविशेषः। इति हेमचन्द्रः॥ (सप्तमद्वापरस्य व्यासः। यथा, देवीभागवते। १। ३। २८।
"मघवा सप्तमे प्राप्ते वशिष्ठस्त्वष्टमे स्मृतः।")

मघवान्, [त्] पुं, (मघवत्। "मघवा बहुलम्।" ६। ४। १२८। इति पक्षे तृ-आदेशः। ऋ इत्।) इन्द्रः। इत्यमरटीकायां रमानाथः। व्याकरणञ्च॥ (यथा, महाभारते। ३।४५।१०।
"एको वै रक्षिता चैव त्रिदिवं मघवानिव॥"
दनोः पुत्त्रभेदः। यथा, मात्स्ये। ६। १८।
"मरीचिर्मघवांश्चैव इरागर्भशिरास्तथा।")

मघा, स्त्री, (मह्+घः। हस्य घत्वम्।) औषधविशेषः। इति धरणिः॥ अश्विन्यादिसप्तविंशनक्षत्रान्तर्गतदशमनक्षत्रम्। तत्तु लाङ्गलाकृति पञ्चतारात्मकम्। गृहाकृति। इति केचित्। अस्याधिष्ठातृदेवता पितृगणः। यथा,—
"लाङ्गलाकृतिनि पञ्चतारके
चारुकेशि पितृभे शिरोगते।
नीलनीरदविनिन्दिलोचने!
दृश्चिकादिगलितं कलाशतम्। १। ४०॥"
इति कालिदासकृतरात्रिलग्ननिरूपणम्॥

तत्र जातफलम्।
कठोरचित्तः पितृमातृभक्त-
स्तीव्रस्वभावश्चनवद्यविद्यः।
चेज्जन्मभं यस्य मघानघः स्या-
ज्जातिः सदारातिविनाशदक्षा॥"
इति कोष्ठीप्रदीपः॥

मघाशब्दो बहुवचनान्तोऽपि दृश्यते। यथा,—
"कृष्णपक्षे त्रयोदश्यां मघास्विन्दुः करे रविः।
यदा तदा गजच्छाया श्राद्धे पुण्यैरवाप्यते॥
अपि च।
नवोदके नवान्ने च गृहप्रच्छादने यथा।
पितरः स्पृहयन्त्यन्नमष्टकासु मघासु च॥"
इति तिथ्यादितत्त्वम्॥

एकवचनान्तप्रयोगो यथा,—
"मघायां पिण्डदानेन ज्येष्ठपुत्त्रो विनश्यति।"
इति मलमासतत्त्वम्॥

(अस्यां व्याधिजननेऽरिष्टत्वं यथा,—
"मघा भरणीहस्तेषु मूले वा ज्वरितोऽपि वै।
मृत्युमाप्नुयते सोऽपि नात्र कार्य्या विचारणा॥
"नवरात्रं तथाश्लेषा मघास्वेति यमालयम्॥"
इति हारीते द्वितीये स्थाने चतुर्थेऽध्याये॥)

मघात्रयोदशी, स्त्री, (मघा दशमनक्षत्रम्। मघायुक्ता त्रयोदशी। इति मध्यपदलोपी कर्म्मधारयः।) मघानक्षत्रयुक्तभाद्रकृष्णत्रयोदशी। यथा। प्रौष्ठपद्यूर्द्धं कृष्णत्रयोदश्यां मघायुक्तायां अनिषिद्धयत्किञ्चिद्द्रव्येण श्राद्धमावश्यकम्। श्राद्धादिविधिवाक्येषु नक्षत्रविशिष्टश्रुतेः। ततश्च केवलत्रयोदशी केवलमघा श्राद्धार्थवादा अपि कृष्णविशिष्टविधिप्राप्तकर्म्मणो नित्यत्वबोधका न तु केवलविध्यन्तरकल्पका गौरवात्। तथा च शङ्खः।
"प्रौष्ठपद्यामतीतायां मघायुक्तां त्रयोदशीम्।
प्राप्य श्राद्धं हि कर्त्तव्यं मधुना पायसेन च॥"
मनुः।
"यत्किञ्चिन्मधुना मिश्रं प्रदद्यात्तु त्रयोदशीम्।
तदप्यक्षयमेव स्याद्वर्षासु च मघासु च॥"
विष्णुधर्म्मोत्तरे।
"प्रौष्ठपद्यामतीतायां तथा कृष्णा त्रयोदशी।
एतांस्तु श्राद्धकालान् वै नित्यानाह प्रजापतिः॥"
शातातपः।
"पितरः स्पृहयन्त्यन्नमष्टकासु मघासु च।
तस्माद्दद्यात् सदोद्युक्तो विद्वत्सु ब्राह्मणेषु च॥"
अत्रान्नमात्रश्रुतेः मनुवचने यत्किञ्चित् श्रुतेश्च शङ्खोक्तपायसः फलातिशयार्थः गुणविशेषे फलविशेषः स्यादिति न्यायात्। यत्तं विष्णुधर्म्मोत्तरे।
"मघायुक्ता च तत्रापि शस्ता राजंस्त्रयोदशी।
तत्राक्षयं भवेत् श्राद्धं मधुना पायसेन च।
तत्र अश्वयुक्कृष्णपक्षे। अत्र यत् श्राद्धं तन्मधुयोगेन वा अक्षयं भवेत्। अतएव मनुवचने यत्किञ्चिन्मधुना मिश्रमित्यनेन मधुमात्रयुक्तत्वमुक्तम्। अतोऽत्र सुतरां शूद्रस्याधिकारः॥ * ॥ अत्र गजच्छायायोगे फलातिशयः। तथा कृत्यचिन्तामणौ स्मृतिः।
"कृष्णपक्षे त्रयोदश्यां मघास्विन्दुः करे रविः।
यदा तदा गजच्छाया श्राद्धे पुण्यैरवाप्यते॥"
करे हस्तानक्षत्रे। कन्यादशमांशोपरि सपादत्रयोविंशांशः इति यावत्॥ * ॥ अविभक्तानामप्यत्र पृथक् श्राद्धमावश्यकम्। यथा, श्राद्धचिन्तामणौ स्मृतिः।
"विभक्ता अविभक्ता वा कुर्य्युः श्राद्धमदैविकम्।
मघासु च ततोऽन्यत्र नाधिकारः पृथग्विना॥"